तच्छ्रुत्वाजानकीप्राहहनूमंतंकृतांजलिम् ॥ वानराणांमनुष्याणांसंगतिर्घटतेकथम् २५ यथात्वंरामचन्द्रस्यदासोऽहमितिभाषसे ॥तामाहमारुतिःप्रीतोजानकींपुरतःस्थितः २६ ऋष्यमूकमगाद्रामःशवर्यानोदितःसुधीः॥ सुग्रीवोऋष्यमूकस्थोदृष्टवान्रामलक्ष्मणौ २७ भीतोमांप्रेषयामासज्ञातुंरामस्यहृद्गतम् ॥ ब्रह्मचारिवपुर्धृत्वागतोऽहंरामसंनिधिम् २८ ज्ञात्वारामस्यसद्भावंस्कंधोपरिनिधायतौ ॥ नीत्वासुग्रीवसामीप्यंसख्यंचाकारवंतयोः२९ सुग्रीवस्यहृताभार्यावालिनातंरघूत्तमः ॥ जघानैकेनबाणेनततोराज्येभ्यषेचयत् ३० सुग्रीवंवानराणांसःप्रेषयामासवानरान् ॥ दिग्भ्योमहाबलान्वीरान्भवत्याःपरिमार्गणे ३१ ॥

(तत्श्रुत्वाकृतांजलींहनुमंतंजानकीप्राह मनुष्याणांवानराणांसंगतिःकथंघटते) सो सुनिकै हाथ जोरेहुये जो हनुमान तिनप्रति जानकीबोलीं कि मनुष्योंकी अरु वानरोंकी संगति कौन प्रकार ह्वै सक्ती है २५ यथात्वंइतिभाषसेअहंरामचन्द्रस्यदासः प्रीतःमारुतिःपुरतःस्थितःतांजानकींआह) जैसे तू ऐसाकहे कि मैं रामचन्द्रको दासहौं यह संगति कैसे भई सो कहु तव प्रीतिपूर्वक पवनपुत्र आगे खड़ेह्वै तौन हाल जानकीप्रति कहनेलगे २६ (शवर्यानोदितः सुधीरामःऋष्यमूकं अगात्ऋष्यमूकस्थःसुग्रीवःरामलक्ष्मणौदृष्टवान्) शवरीके कहेते सुबुद्धीरघुनन्दन ऋष्यमूकपर्वतको आवतेरहैं ऋष्यमूकपरबैठेहुये सुग्रीव राम लक्ष्मणको आवतेदेखा २७ (भीतःरामस्यहृद्गतम्ज्ञातुंमांप्रेषयामास ब्रह्मचारिवपुःधृत्वाअहंरामसन्निधिंगतः) सुग्रीवडरायकै रामके हृदयकी वात जानिवेहेत मोको पठावतेभये ब्रह्मचारीरूपधरि मैं रघुनन्दनके समीपगया २८ (रामस्यसत्भावंज्ञात्वातौस्कंधेउपरि

निधायसुग्रीवसामीप्यंनीत्वातयोःसख्यंचकारवं) रघुनन्दनको सत्भावजानिकै राम लक्ष्मण दोऊको अपनेकांधे ऊपरचढ़ाय सुग्रीवके समीपकोलायों तिनकेसाथ सुग्रीवने मित्रताकिया २९ (वालिना सुग्रीवस्यभार्याहृतातंरघूत्तमःएकेनवाणेनजघान ततः वानराणांराज्येसुग्रीवंअभ्यपेचयत्) बालीने सुग्रीवकीभार्याकोहरिलिया तिसवालीको रघुनन्दन एकहीवाणकरिकैमारे तदनन्तर वानरोंकी राज्य में सुग्रीवको अभिषेककिये ३० (सःभवत्यापरिमार्गणेमहावलान्वीरानवानरान्दिग्भ्योप्रेषयामास) सो सुग्रीव तुम्हारे ढूंढनेहेत महावली वीरवानरनको सब दिशनको पठावतेभये ३१ ॥

गच्छंतंराघवोदृष्ट्वामामभाषतसादरम् ॥ त्वयिकार्यमशेषंमेस्थितंमारुतनंदन३२ ब्रूहिमेकुशलंसर्वंसीतायैलक्ष्मणस्यच ॥ अंगुलीयकमेतन्मेपरिज्ञानार्थमुत्तमम् ३३सीतायैदीयतांसाधुमन्नामाक्षरमुद्रितम् ॥ इत्युक्त्वाप्रददौमह्यंकराग्रादंगुलीयकम् ३४ प्रयत्नेनमयानीतंदेविपश्यांगुलीयकम् ॥ इत्युक्त्वाप्रददौदेव्यैमुद्रिकांमारुतात्मजः ॥ नमस्कृत्वास्थितोदूराद्बद्धांजलिपुटोहरिः ३६ दृष्ट्वासीताप्रमुदितारामनामांकितांतदा॥ मुद्रिकांशिरसाधृत्वास्रवदानंदनेत्रजा ३७ कपेमेप्राणदातात्वंबुद्धिमानसिराघवे ॥ भक्तोसिप्रियकारीत्वंविश्वासोऽस्तितवैवहि ३८ ॥

(गच्छंतंदृष्ट्वाराघवःसादरम्मांअभाषत) चलत समय देखिकै रघुनन्दनसहित आदरमोंप्रति बोले ३२ (मारुतनन्दनमेअशेषंकार्यंत्वयिस्थितंलक्ष्मणस्यचमेसर्वंकुशलंसीतायैब्रूहि) रघुनन्दनकहे कि हे मारुतनंदन मेरा सम्पूर्ण कार्य तुमविषे स्थितहै भावसवकार्य तुमहींकरिहौ ताते लक्ष्मणकी पुनः मेरी सब भांतिकी कुशल सीताके अर्थसुनायउ ३३ (साधुमन्नामाक्षरमुद्रितम्एतत्मेअंगुलीयकम् उत्तमम्परिज्ञानार्थंसीतायैदीयताम्) हे साधुहनुमान् मेरेनामके अक्षरनकरिकै अंकित यह मेरीमुद्रिका उत्तमलैजाउ ताको अपने पहिचानकरावनेकेहेत सीताके अर्थदेना ३४ (इतिउक्त्वाकराग्रात्अंगुलीयकम्मह्यंप्रददौप्रयत्नेनमयानीतंदेविअंगुलीयकम्पश्य) ऐसाकहि रघुनन्दन अपनी अँगुरीते उतारिमुद्रिका मेरेअर्थदेतेभये ताहियत्नपूर्वक मैनेलाया हे देवि मुद्रिकाको देखिये ३५ (इतिउक्त्वामारुतात्मजःमुद्रिकांदेव्यैप्रददौबद्धांजलिपुटःहरिःदूरात्नमस्कृत्वास्थितः) ऐसाकहि मारुतनन्दन मुद्रिकाको जानकीदेवी के अर्थ दै देतेभये पुनः हाथजोरि हनुमान दूरिहीते नमस्कारकरि-खड़ेभये ३६ (तदारामनामांकितामुद्रिकांदृष्ट्वामुदितासीताशिरसाधृत्वाआनंदनेत्रजास्रवत्) ता समयमें रामनामकरिकै चिह्नित जो मुद्रिकाताहिदेखि मनमें हर्ष सहित मुद्रिकाको शीशपरधरि प्रेमानन्द आंशु नेत्रनतेगिरनेलगे ३७(कपेत्वंमेप्राणदाताबुद्धिमानसित्वंप्रियकारीराघवेभक्तोसितवएवहिविश्वासःअस्ति) हे कपि तू मेरे प्राणदेनेवाला वड़ाबुद्धिमानहसि प्रियकार्यकरनेवाला रघुनंदन विषे परमभक्त हसि इसीते तुम्हारेविषे रघुनन्दनकी विश्वासहै निश्चयकरि ३८ ॥

नोचेन्मत्सन्निधिंचान्यंपुरुषंप्रेषयेत्कथम् ॥ हनूमन्दृष्टमाखिलंममदुःखादिकंत्वया ३९ सर्वंकथयरामाययथामेजायतेदया ॥ मासद्वयावधिप्राणाःस्थास्यंतिममसत्तम ४० नागमिष्यतिचेद्रामोभक्षयिष्यतिमांखलः ॥ अतःशीघ्रंकपीन्द्रेनसुग्रीवेणसमन्वितः ४१ वानरानीकपैःसार्द्धंहत्वारावणमाहवे ॥ सपुत्रंसवलंरामोयदिमांमोचयेत्प्रभुः ४२ तत्तस्यसदृशंवीर्यंवीरवर्णयवर्णितम् ॥ यथामांतारयेद्रामोह

त्वाशीघ्रंदशाननम् ४३ तथायतस्वहनुमन्वाचाधर्ममवाप्नुहि ॥ हनुमानपितामा
हदेविदृष्टोयथामया ४४ रामःसलक्ष्मणःशीघ्रमागमिष्यतिसायुधः ॥ सुग्रीवेणस
सैन्येनहत्वादशमुखंबलात् ४५ ॥

(नोचेत्अन्यंपुरुषंमत्सन्निधिंचकथंप्रेषयेत् हनूमान्ममदुःखादिकं अखिलंत्वयादृष्टं) नाहींतो अन्यप्राकृत पुरुष को मेरे समीप को रघुनन्दन कैसे पठावते हे हनूमान् मेरा दुःखादिक संपूर्ण हाल तुमने देखा है ३९ (रामायसर्वंकथय यथामेदयाजायते सत्तममासद्वयावधिममप्राणाःस्थास्यंति) रघुनाथजी के अर्थ मेरा सब हाल ऐसी भांति कहेउ जिसते मेरे ऊपर प्रभु की दया उत्पन्न होय हेहनूमान् परसोत्तम दुइ मास तक मेरे प्राण शरीर में स्थितरहि सके हैं ४० (चेत्रामःनआगमिष्यति खलःमांभक्षयिष्यति अतःकपींद्रेणसुग्रीवेण समन्वितःशीघ्रं) कदाचित् दो मास के भीतर रघुनन्दन न आवहिं गे तौ खल रावण मोको भक्षण करि लेइगो इसकारण ते कपिराज सुग्रीव करिकै सहित शीघ्रहीं ४१ (वानरानीकपैःसार्द्धंरामः प्रभुःसपुत्रंसबलंरावणं आह वेहत्वामांमोचयत्) वानरी सेना सेना पतिन करिकै सहित रघुनन्दन प्रभु इहां आयकै सहित पुत्र सहितसेना रावणको संग्राममें मारैं जो मोको इस संकटते छुड़ावा चाहैं ४२ (वीरवर्णितंतस्यसदृशं तत्वीर्यंवर्णय यथारामःशीघ्रंदशाननम् हत्वामांतारय) हेमहाबीर यज्ञ रक्षा धनुभंग परशुराम पराजय खर वध इत्यादि पूर्व को जो प्रभुको बल लोकमें वर्णनह्वै रहा है ताहीकी तुल्यसो बल वर्णन किहेउ जिस प्रकाररघुनन्दन शीघ्रहीं रावण को मारि मोको शोक सिंधुते पारकरैं ४३ (हनुमत्तथायतस्ववाचाधर्मंआप्नुहि हनुमान्अपितांआह देविमयायथादृष्टः) हे हनुमत् जैसे मेरा उद्धार होय तैसेही यत्न करना यामें तुम वाचा धर्म को प्राप्त होउगे भाव वचन द्वारातुम को धर्म होइगो तब हनुमान् भी जानकी प्रति बोले हे देवि मैंने जैसे उद्यत प्रभु को देखा है ताते ऐसा अनुमान होत ४४ (ससैन्येनसुग्रीवेण सलक्ष्मणःसायुधःरामःशीघ्रं आगमिष्यति बलात्दशमुखंहत्वा) सहित सैन्य सुग्रीव सहित लक्ष्मणसहित हथियारन सहित रघुनन्दन शीघ्रही आवैंगे अपनेबलते रावण को मारिकै ४५ ॥

समानेष्यतिदेवित्वामयोध्यांनात्रसंशयः ॥ तमाहजानकीरामःकथंवारिधिमातत
म् ४६ तीर्त्वायास्यत्यमेयात्मावानरानीकपैःसह ॥ हनुमानाहमेस्कंधावारुह्यपु
रुषर्षभौ ४७ आयास्यतःससैन्यश्चसुग्रीवोवानरेश्वरः ॥ विहायसाक्षणेनैवतीर्त्वा
वारिधिमाततम् ४८ निर्दहिष्यतिरक्षौघान्त्वत्कृतेनात्रसंशयः ॥ अनुज्ञांदेहिमे
देविगच्छामित्वरयान्वितः ४९ द्रष्टुंरामःसहभ्रात्रात्वरयामितवांतिकम् ॥ देविकिं
चिदभिज्ञानंदेहिमेयेनराघवः ५० विश्वसेन्मांप्रयत्नेनततोगंतासमुत्सुकः ॥ ततः
किंचिद्विचार्याथसीताकमललोचना ५१ ॥

(देवित्वांअयोध्यांसंआनेष्यति अत्रसंशयःन) हे देवि जानकी तुमको प्रभु अयोध्या को लैजाँयगे यामें संशय नहीं है ४६ (तंसीताआहवानरानीकपैः सहअमेयात्मारामः आततम्वारिधिंकथंतीर्त्वा आयास्यति) तिन हनुमान् प्रति जानकी बोलीं कि अप्रमाण आत्मा रघुनन्दन बानरी सेना सहित ऐसे भारी विस्तार समुद्र को कैसे उतरि कै आवहिंगे ४७ (हनुमान्आहमेस्कंधौ आरुह्यपुरुषर्षभौ आयास्यतःच ससैन्यवानरेश्वरः सुग्रीवःविहाय साक्षणेनैव आततंवारिधिंतीर्त्वा) हनुमान् बोले कि

मेरे कांधों पर चढ़ि पुरुषोंमें उत्तम राम लक्ष्मण आवहिंगे पुनः सहित सेना वानरोंके राजा सुग्रीव स्वबल ते आकाश मार्ग करिके क्षणै भरे में विस्तार युत समुद्र को उतरि पार चले आवहिंगे ४८ (स्वत्कृतेरक्षौघान् निर्दहिष्यति अत्रसंशयःन देविमेअनुज्ञांदेहि त्वरयान्वितःगच्छामि) हनुमान्बोले हेमात. तुम्हारे हेत राक्षस समूहन को रघुनाथ जी भस्म करि देइँगे इसमें संशय नहीं है हेदेवि अब मोको प्रभु पास जाने की आज्ञा दीजिये शीघ्रता युत जॉउ गो ४९ (सहभ्रात्रारामः द्रष्टुं तव अंतिकमृत्वरयामि देविकिंचित् अभिज्ञानंमेदेहि येनराघवः मांविश्वसेत्) सहित भ्राता लक्ष्मण रघुनन्दन के देखने को मोको आतुरता है उहां ते पुनः तुम्हारे पास को शीघ्रही आवेंगो हे देवि अब कछु चिह्न की वस्तु मोको दीजिये जिस करिके रघुनन्दन मेरी बिश्वास करें ५० (ततः प्रयत्नेनसंउत्सुकः गंताततःकमललोचनः सीताकिंचिद्विचार्याथ) तदनन्तर आपकी दीहुई वस्तुको यत्नपूर्वक गुप्त राखे उत्कंठा सहित प्रभुके पास जाउँगो इति सुनि तदनन्तरकमलसमनेत्रहैं जिनके ऐसी जो सीता सो मनमें कछु विचार करिके भाव कौन भूषण देवें इति विचारि तब ५१॥

विमुच्यकेशपाशांतेस्थितंचूडामणिंददौ ॥ अनेनविश्वसेद्रामस्त्वांकपींद्रसलक्ष्मणः ५२ अभिज्ञानार्थमन्यच्चवदामितवसुव्रत ॥ चित्रकूटगिरौपूर्वमेकदारहसिस्थितः ५३ मदंकेशिरआधायनिद्रातिरघुनन्दनः॥ ऐंद्रःकाकस्तदागत्यनखैस्तुंडेनचासकृत् ५४ मत्पादांगुष्ठमारक्तंविददारामिषाशया ॥ ततोरामःप्रबुद्ध्याथ दृष्ट्वापादंकृतव्रणम् ५५ केनभद्रेकृतंचैतद्विप्रियंमेदुरात्मना ॥ इत्युक्त्वापुरतोपश्यद्वायसंमांपुनःपुनः ५६ अभिद्रवंतंरक्तास्यंनखतुंडंचुकोपह ॥ तृणमेकमुपादायदिव्यास्त्रेणाभ्ययोज्यतत् ॥ चिक्षेपलीलयारामोवायसोपरितज्ज्वलत् ५७ ॥

(केशपाशांतेस्थितंचूडामणिंविमुच्यददौकपींद्रअनेनसलक्ष्मणःरामःत्वांविश्वसेत्) जूड़ामें स्थित जो चूड़ामणि ताहि छोरिके जानकीजी देतीभई पुनः बोली हेकपि नायक हनुमान् इसमणि करिके सहित लक्ष्मण रघुनंदन तुम विषे विश्वास करेंगे ५२ (चसुव्रततवअभिज्ञानार्थंअन्यत्वदामिपूर्वंचित्रकूटगिरौएकदारहसिस्थितःरघुनंदनमत्अंकेशिरआधायनिद्राति) सुंदर ब्रह्मचर्य व्रतधारण करनेवाले इति हेसुव्रत हनूमान् तुमको पहिचान देने हेत और कछुगुप्तवार्त्ता मैं कहतीहौं सुनो पूर्वकाल चित्र कूट पर्वतमें एकांत में बैठेहुये रघुनंदन मेरे अकोरामें शिरकोधरि निद्राको प्राप्तभये ५३ तदाऐंद्रःकाकःआगत्यआमिषाशयाआरक्तंमत्पादांगुष्ठंनखैःचतुण्डेनअसकृत् विददार) ताहीसमय इंद्रको पुत्रका करूपते आवामांसकी आशाकरिके लालवर्ण मेरेपायँनको अंगुष्ठा देखि ताहिनखौं करिकै पुनःचोच करिकै वारम्वार विदारन अर्थात् घावकरि देताभया ५४ (ततःरामःप्रबुद्ध्यअथकृतव्रणम्पादंदृष्ट्वाभद्रे एतत्मेविप्रियंदुरात्मनाकेनकृतं) तदन्तर रघुनंदन जागे तब कियागया है घावजामें ऐसाजो मेरा पांव ताहि देखिमो प्रतिबोले हे कल्याण रूपेयह तेरेपद अंगुष्ठको विदारण रूपमेरा अप्रिय कार्य को दुष्टात्मा किसनेकिया ५५(इतिउक्त्वापुरतःनखचोंचरक्तआस्यंमांपुनः पुनःअभिद्रवंतंवायसंअपश्यत् चुकोपह) ऐसा कहि आगेदृष्टि कियेतहां रक्तभरे नखचोंच मुखलालहै जाको मेरी दिशि वारम्वारधावताहुआ काकको देखि रघुनंदन कोप करतेभये तब ५६ (एकंतृणंआदायदिव्यअस्त्रेणाभ्य योज्यतत् लीलयारामःवायसस्यउपरिचिक्षेपतत्ज्वलत्) एक तृणलैके दिव्य ब्रह्मास्त्रमंत्रसों मंत्रित करि सो लीलामात्र रघुनंदन उसीकाक के ऊपर छांड़ि दिये सो अग्निवत् वरताहुआ ५७॥

अभ्यद्रवद्वायसश्चभीतोलोकान्भ्रमत्पुनः ॥ इन्द्रब्रह्मादिभिश्चापिनशक्योरक्षितुं तदा ५८ रामस्यपादयोरग्रेऽपतद्भीत्यादयानिधेः ॥ शरणागतमालोक्यरामस्त मिदमब्रवीत् ५९ अमोघमेतदस्त्रंमेदत्त्वैकाक्षमितोव्रज ॥ सव्यंदत्त्वाततःकाकएवं पौरुषवानपि ६० उपेक्षतेकिमर्थंमामिदानींसोपिराघवः ॥ हनूमानपितामाहश्रु त्वासीतानुभाषितम् ६१ देवित्वांयदिजानातिस्थितामत्ररघूत्तमः ॥ करिष्यतिक्ष णाद्भस्मलंकांराक्षसमण्डिताम् ६२ जानकीप्राहतंवत्सकथंत्वंयोत्स्यसेऽसुरैः ॥ अतिसूक्ष्मवपुःसर्वेवानराश्चभवादृशाः ६३ ॥

(अभ्यद्रवत्चवायसःभीतःलोकान्भ्रमत्पुनः इंद्रब्रह्मादिभिःचापिरक्षितुंनशक्यः) अग्नितुल्य बरताहुआतृण वाण आवत देखि काकभयभीत सबलोकन में भ्रमता फिरा तहां इंद्रब्रह्मादिकों करि जब रक्षाको न प्राप्त भया ५८ (तदा भीत्यादयानिधेःरामस्यपादयोः अग्रेअपतत्शरणागतंआलोक्य रामःतंइदंअब्रवीत्) तबडर करिकै दयाभरे रघुनंदन के पांयन के आगेत्राहि त्राहि करिगिरिपरा शर णागत काकको देखि रघुनंदन त्यहि प्रतिऐसा वचन बोलतेभये ५९ (एतत्मेअस्त्रंअमोघंएकाक्षंदत्त्वा इतःव्रजततःकाकसव्यंदत्त्वाएवंपौरुषवान्अपि)रघुनंदन कहे कि यहमेरा वाण वृथानहीं जायसक्ताहै ताते आपनाएक नेत्रदैकै यहांते चलाजा तदनन्तर काक आपनावामनेत्रदैकै प्राण बचाय गया ऐसे पराक्रम युक्तप्रभु ६०(सःअपिराघवःकिंअर्थंमांइदानींउपेक्षतेसीतानुभाषितंश्रुत्वाहनूमान्अपितांआह) सोई राघव किसहेत मोको या समय ऐसी दशामें दयादृष्टि नहींदेखते हैं इति आरत सीताको कहा वचन सुनि हनुमान् भी तिन जानकीजी प्रति बोलतेभये ६१ (देवियदिअत्रस्थितात्वांरघूत्तमःजाना तिराक्षसमण्डिताम्लंकाम्क्षणात्भस्मकरिष्यति) हनुमान् कहे किहे देविजो इहांपर रहतीहुई तुम को मेरेकहेते रघुनाथजी जानेंगे तौ राक्षसों करिकै भूषित यह जो लंका है ताहि प्रभुएक क्षणभरे में भस्म करि देवैंगे ६२ (तंजानकीप्राहवत्सअतिसूक्ष्मवपुःचभवादृशाःसर्वेवानराःत्वंअसुरैःकथंयोत्स्यसे तिनहनुमान् प्रति जानकी बोलती भई हे वत्स तुम्हारा अत्यन्त छोटाशरीर अरु तुम्हारेही समसबै वानरहोंयँगे तौ तुम राक्षसों करिकै कैसे युद्धकरि सकोगे ६३ ॥

श्रुत्वातद्वचनंदेव्यैपूर्वरूपमदर्शयत् ॥ मेरुमंदरसंकाशंरक्षोगणविभीषणम् ६४ दृष्ट्वासीताहनूमंतंमहापर्वतसन्निभम् ॥ हर्षेणमहताविष्टाप्राहतंकपिकुंजरम् ६५ समर्थोसिमहासत्वद्रक्ष्यंतित्वांमहाबलम् ॥ राक्षस्यस्तेशुभःपंथागच्छरामांतिकं द्रुतम् ६६ बुभुक्षितःकपिःप्राहदर्शनात्पारणंमम ॥ भविष्यतिफलैःसर्वैस्तवदृष्टौ स्थितैर्हिमे ६७ तथेत्युक्तःसजानक्याभक्षयित्वाफलंकपिः ॥ ततःप्रस्थापितोऽग च्छज्जानकींप्रणिपत्यसःकिंचिद्दूरमथोगत्वास्वात्मन्येवानुचिंतयत् ६८ कार्यार्थ मागतोदूतःस्वामिकार्याविरोधतः ॥ अन्यत्किंचिदसंपाद्यगच्छत्यधमएवसः६९॥

(तत्वचनंश्रुत्वारक्षोगणविभीषणंमेरुमंदरसंकाशंपूर्वरुपंदेव्यैअदर्शयत्) सोसीता को बचनसुनि कै हनुमान् राक्षस समूहको भयदायक ऐसाकराल पुनःसुमेरुगिरि मंदराचल की तुल्यभारी उन्नत ऐसा आपना पूर्वको रूपप्रकट करि सीता देवीके अर्थ देखावते भये ६४(महापर्वतसंन्निभम्हनूमंतं

दृष्ट्वासीताहर्षेणमहताविष्टातंकपिकुंजरंप्राह) महाभारी पर्वत समरूप हनूमान् को देखिकै सीता आनंद समूह करिकै युक्तिन हनुमान् प्रतिबोलतीभई ६५ (महासत्त्वसमर्थोऽसिमहाबलम्त्वांराक्षस्यः द्रक्ष्यंतिरामांतिकंद्रुतंगच्छतेपंथाःशुभः) हेहनूमान् तुममहापराक्रमी सर्वकार्यकोसमर्थहौअवमहाबलवंतरूप तुमको राक्षसी देखैंगी तौ जाय रावणते कहैंगी तौतुम्हारे जानेमें बाधालागैगी तातेअबतुम शीघ्रही रघुनन्दनके पासको चलेजाउ तुमको मार्गमंगलकारीहोवै ६६ (कपिःबुभुक्षित.प्राहतवदर्शनात्ममपारणंतवदृष्टौस्थितैःहिसर्वैःफलैःमेभविष्यति) हनुमान् भूखेहैंतातेबोले हे मातःयावत्देख्यो नहींतावत् उपवासकिहेउँ अब आपके दर्शन भयेते व्रतपूर्ण भया ताते मोको पारण उचित है सो आपकी दृष्टि के आगेस्थित जो वाग में सबफल हैं तिनहीं करिकै मेरा पारण होइगो ६७ (जानक्यातथाइतिउक्तःसकपिःफलंभक्षयित्वाततःअगच्छत्जानकींप्रणिपत्यप्रस्थापितःस. किंचित्दूरंगत्वा अथ.स्वआत्मनिएवअनुचिंतयत्) जानकी के तथाइति कहेभाव आज्ञापाय सो कपि हनुमान् फल खाय तदनन्तर आय जानकीको प्रणामकरि विदाह्वै चले सो कछु दूरिगये अब आपने मनमें चिन्तवनकीन्हे ६८ (कार्यार्थेदूतःआगतःस्वामिकार्यअविरोधनःकिंचित्अन्यत्असंपाद्यगच्छतिसः एवअधमः) मालिकके पठाये किसी कार्यहेत दूतआया तहां जिसमें स्वामीकेकार्यमें विरोध न आवताहोय भावउसीकी अनुकूल कछु और कार्य न साधिलिया केवल स्वामीकी आज्ञापूर्णकरि चलागया सो दूतभी अधम है ६९ ॥

अतोऽहंकिंचिदन्यच्चकृत्वादृष्ट्वाथरावणम् ॥ संभाष्यचततोरामदर्शनार्थंव्रजाम्यहम् ७० इतिनिश्चित्यमनसावृक्षखण्डान्महाबलः॥उत्पाट्याशोकवनिकांनिर्वृक्षामकरोत्क्षणात् ७१ सीताश्रयनगंत्यक्त्वावनंशून्यंचकारसः ॥ उत्पाटयंतंविपिनंदृष्ट्वाराक्षसयोषितः ७२ अपृच्छन्जानकींकोऽसौवानराकृतिरुद्भटः ७३ जानक्युवाच ॥ भवत्यएवजानन्तिमायांराक्षसनिर्मिताम् ॥ नाहमेनंविजानामि दुःखशोकसमाकुला ७४ इत्युक्तास्त्वरितंगत्वाराक्षस्योभयपीडिताः॥ हनूमताकृतंसर्वंरावणायन्यवेदयत् ७५ देवकश्चिन्महासत्त्वोवानराकृतिदेहभृत् ॥सीतयासहसंभाष्यअशोकवनिकांक्षणात्॥उत्पाट्यचैत्यप्रासादंबभंजामितविक्रमः ७६ ॥

(अतःअहंकिंचित्अन्यत्कृत्वाचरावणंदृष्ट्वाचसंभाष्यततःरामदर्शनार्थंअहंव्रजामि)इस कारण मैं कछु और हू कार्यकरौं पुनः रावणको देखिलउ पुनः तासों कछु वार्ताकरि तदनन्तर रघुनाथजीके दर्शनहेत को मैं जाउँ ७० (इतिमनसानिश्चित्यमहाबलः वृक्षखंडान्उत्पाट्यक्षणात्अशोकवनिकां निर्वृक्षंअकरोत्) ऐसा मनमें निश्चयकरि महाबलीहनुमान् वृक्षसमूहोंको उखारि क्षणभरेमें अशोकवाटिकाको विनावृक्षकीकरिदेतेभये ७१ (सीताश्रयनगत्यक्त्वासःवनंशून्यंचकार विपिनंउत्पाटयंतं दृष्ट्वाराक्षसयोषितः)सीताके वास स्थानको एक वृक्ष वरायसो अशोकवन सब शून्यकरिदिये उसवनको उखारत देखि राक्षसों की स्त्री ७२ (जानकींअपृच्छन्वानराकृतिःउद्भटःअसौकः) जानकी प्रति पूछती हैं कि वानरकी आकार उद्भटवीर यह कौनहै ७३ (राक्षसनिर्मितांमायांभवत्यएवजानंतिदुःखशोकसमाकुलाअहं एनंनविजानामि) जानकी बोलीं कि राक्षसों की रचीहुई माया को तुमहीं लोग जानती हो दुखशोक में आकुल मैं इस वानर को नहीं जानतीहौं कौन है ७४ (इतिउक्ताभयपीड़िताः राक्षस्यः त्वरितंगत्वाहनूमताकृतंसर्वंरावणायन्यवेदयत्) ऐसा जानकी कहे तब भय

पीडित राक्षसी त्वरतहीं जाय हनुमान् को किया हुआ सब हाल रावणके अर्थ सुनावती भई ७५ (देवकश्चित्वानराकृतिःदेहभृत्महासत्वःसीतयातहसंभाष्यक्षणात्अशोकवनिकां उत्पाट्यअमितविक्रमःचैत्यप्रासादंवभंज) हे देव कोउ एक देवादिवानरकी देहधरे महापराक्रमी आयसीता के साथवार्ता करिक्षणमें अशोक वाटिका उखारि डारा ऐसा अमितवली है कि देवमंदिर को तोरि फोरि गिरायदीन्हेसि ७६ ॥

प्रासादरक्षिणःसर्वान्हत्वातत्रैवतस्थिवान् ॥ तच्छ्रुत्वातूर्णमुत्थायवनभंगंमहाप्रियम् ७७ किंकरान्प्रेषयामासनियुतंराक्षसाधिपः ॥ निर्भग्नचैत्यप्रासादप्रथमांतरसंस्थितः ७८ हनुमान्पर्वताकारोलोहस्तंभकृतायुधः ॥ किंचिल्लांगूलचलनोरक्तास्योभीषणाकृतिः ७९ आपतंतंमहासंघंराक्षसानांददर्शसः ॥ चकारसिंहनादंचश्रुत्वातेमुमुहुर्भृशम् ८० हनूमंतमथोदृष्ट्वाराक्षसाभीषणाकृतिम् ॥ निर्जघ्नुर्विविधास्त्रौघैःसर्वराक्षसघातिनाम् ८१ ततउत्थायहनुमान्मुद्गरेणसमंततः ॥ निष्पिपेषक्षणादेवमशकानिवयूथपः ८२ ॥

(प्रासादस्यरक्षिणःसर्वान्हत्वातत्रएवतस्थिवान्महाप्रियंवनभंगंतदश्रुत्वातूर्णंउत्थाय) मंदिर के रक्षा करनेवालेरोकातिन सब को मारिकै वानर वहीं बैठा भी है परमप्रिय वनको भंग सो सुनि रावणशीघ्रहीउठा ७७ (राक्षसाधिपःनियुतंकिंकरान्प्रेषयामासचैत्यप्रासादनिर्भग्नप्रथमांतरसंस्थितः राक्षसोंको राजा रावणएकलाख सेवकनको पठावता भया नियुत लक्षकोकहीयथा (शतंसहस्त्रमयुतं नियुतंप्रयुतंमतम् । स्त्रीकोटिरर्बुदमितिक्रमाद्दशगुणोत्तरमितिरत्नकोशः) ते आय देखे टूटाहुवा जो देवमंदिर ताके नीचे के दर्जेमें वह बैठा है ७८ (पर्वताकारःभीषणाकृतिःरक्तास्यःहनुमान्लोहस्तंभआयुधःकृतकिंचित्लांगूलचलनः) पर्वत सम भारीतनभयंकर सूरति लालमुख ऐसे हनुमान् लोह खंभाको हथियार बनाय हाथमें लिहे कछु पूछको चलायरहे हैं ७९ (राक्षसानांमहासंघंआपतंतंददर्शसःसिंहनादं चकारचतेश्रुत्वाभृशम्मुमुहुः) राक्षसोंकोमहाभारीयूथआवताहुआ ताहि देखते भये सो हनुमान् सिंहसमभारी नादकरते भये सो गर्जपुनः ते सब राक्षस सुनि कै अत्यंत मोहित भये अर्थात् सबके मूर्च्छाआगया ८० (अथहनूमंतं भीषणाकृतिंराक्षसाहष्ट्वा सर्वराक्षसघातिनांविविधअस्त्रओघैःनिर्जघ्नुः) अब हनुमान्को महाभयंकर रूप ताहि सब राक्षस देखिकै सब राक्षसों को घात करने वाले जो हनुमान् तिनहिं अनेक प्रकार के हथियार बहुतौं करिकै राक्षस मारतेभये ८१ (हनुमानउत्थायतत्मुद्गरेणक्षणात्एवसमंततः निष्पिपेषयूथपःमशकानइव) हनुमान् उठिके तोई मुद्गर अर्थात् लोह खंभ करिकै क्षणै भरे में सब राक्षसों को पीसिडारे कैसे चूर्ण ह्वै गये यथा यूथपति हाथी समूह मसन को पीसिडारै तथा वे परिश्रम चूर्णकिये ८२ ॥

निहतान्किंकरान्श्रुत्वारावणःक्रोधमूर्च्छितः ॥ पंचसेनापतींस्तत्रप्रेषयामासदुर्मदान् ८३ हनूमानपितान्सर्वान्लोहस्तंभेनचाहनत् ॥ ततःक्रुद्धोमंत्रिसुतान्प्रेषयामाससप्तसः ८४ आगतानपितान्सर्वान्पूर्ववद्वानरेश्वरः ॥ क्षणान्निःशेषतोहत्वालोहस्तंभेनमारुतिः ८५ पूर्वस्थानमुपाश्रित्यप्रतीक्षन्राक्षसान्स्थितः ॥ ततोजगामबलवान्कुमारोऽक्षःप्रतापवान् ८६ तमुत्पपातहनुमान्दृष्ट्वाकाशेसमुद्गरः ॥

गगनात्त्वरितोमूर्ध्निमुद्गरेणव्यताडयत् ८७ हत्वातमक्षंनिःशेषबलंसर्वंचकारसः ८८ततःश्रुत्वाकुमारस्यवधंराक्षसपुंगवः॥क्रोधेनमहताविष्टइंद्रजेतारमब्रवीत्८९॥

(किंकरान् निहतानश्रुत्वा क्रोधमूर्च्छितःरावणः दुर्मदान्पंचसेनापतींस्तत्रप्रेषयामास) अपनेसेवकन को मरण सुनिकै क्रोधविवश रावण बल वरितामें दुर्मद पांच सेनापतिन को तहां को पठावताभया जहां हनुमान् रहैं८३ (हनुमानअपिलोहस्तम्भेनच तान्सर्वानहनत् ततःक्रुद्धःसः सप्त मंत्रिसुतान्प्रेषयामास) सेनापतिन को आवत देखि हनुमान् भी संमुखआय उसी लोह खंभ करिकै उन सबन को मारे सो सुनि तदनंतर क्रोध करि सो रावण सातमंत्रीके पुत्रनको पठावताभया ८४ (तान्सर्वान् आगतान् अपिवानरेश्वरः मारुतिःपूर्ववत् लोहस्तंभेनक्षणात् निःशेषतःहत्वा) तिन सबन को आवत देखि वानरेश्वर मारुत नन्दन हनुमान् पूर्व कीनाईं लोहखंभ करिकै क्षणैं भरे में सबनकोमारिकै८५(पूर्वस्थानंउपाश्रित्यस्थितः राक्षसान्प्रतीक्षन् ततःबलवान्प्रतापवानअक्षःकुमारः जगाम) राक्षसौं को मारि जायपूर्वके स्थान में बैठा हुआ राक्षसौं के आवने की राह देखि रहा है तदनंतर महाबली प्रतापवंत अक्षकुमार जाताभया ८६ (तंदृष्ट्वाहनुमान् समुद्गरः आकाशेउत्पपात् गगनात्त्वरितः मुद्गरेणमूर्ध्निव्यताड़यत्) तिस अक्षकुमार को देखि हनुमान् मुद्गर सहित आकाश में कूदिगये आकाशते शीघ्रही आय लोह खंभ करिकै ताके शिर में मारते भये ८७ (तंअक्षंनिःशेषबलंसर्वंसः हत्वाचकार) तिस अक्षकुमार को ताके संग जो सेना रही तिन सब को नाश करते भये ८८ (कुमारस्यवधंश्रुत्वा ततःराक्षसपुंगवः क्रोधेनमहताविष्टः इंद्रजेतारंअब्रवीत्) अक्षकुमार को मरण सुनि तदनंतर राक्षसौं को राजा बड़े क्रोध करिकै युक्त इंद्रको जीतनेवाला जो मेघनाद त्यहि प्रति बोलता भया ८९ ॥

पुत्रगच्छाम्यहंतत्रयत्रास्तेपुत्रहारिपुः ॥ हत्वातमथवाबध्वाआनयिष्यामितेऽतिकम् ९० इन्द्रजित्पितरंप्राहत्यजशोकंमहामते ॥ मयिस्थितेकिमर्थंत्वंभाषसेदुःखितंवचः ९१ बध्वानेष्येद्रुतंतातवानरंब्रह्मपाशतः ॥ इत्युक्त्वारथमारुह्याराक्षसैर्बहुभिर्वृतः ९२ जगामवायुपुत्रस्यसमीपंवीरविक्रमः ॥ ततोऽतिगर्जितंश्रुत्वास्तंभमुद्यम्यवीर्यवान् ९३ उत्पपातनभोदेशंगरुत्मानिवमारुतिः ॥ ततोभ्रमंतंनभसिहनूमंतंशिलीमुखैः९४विध्वातस्यशिरोभागमिषुभिश्चाष्टभिःपुनः ॥ हृदयंपादयुगलषड्भिरेकेनबालधिम् ॥ भेदयित्वाततोघोरंसिंहनादमथाकरोत् ९५ ॥

(पुत्रपुत्रहारिपुःयत्रआस्तेतत्रअहंगच्छामितंहत्वाअथवाबध्वातेअंतिकम्आनायिष्यामि)हे पुत्रमेघनाद मेरेपुत्रको मारनेवाला शत्रु जहांपरहै तहांको मैं जाताहौं ताकोमारिहौं अथवा बांधिकै तेरेपास कोलाइहौं ९० (पितरंइन्द्रजित्प्राहमहामतेशोकंत्यजमयिस्थितेत्वंदुःखितंवचःकिंअर्थंभाषसे) पिता प्रति मेघनाद बोला कि हेमहामते शोकमानसो खेदको त्यागकरौ काहेते मेरेबनेरहेसंते तुम दुःखित वचन किस हेत कहते हौ ९१ (तातब्रह्मपाशतःवानरंबध्वाद्रुतंआनेष्येइतिउक्त्वारथंआरुह्यबहुभिः राक्षसैःवृतः) रावण प्रति मेघनाद बोला कि हेतात ब्रह्मपाशते वानरको बांधिकै शीघ्रही लिहेआवताहौं ऐसाकहि मेघनाद रथपर सवार ह्वै तथा बहुतेराक्षसौं करिकै वृत अर्थात् अन्य बहुत सुभटरथ के सब दिशि घेरे हुये चलेजातेहैं ९२ (वायुपुत्रस्यसमीपंवीरविक्रमःजगामततःअतिगर्जितंश्रुत्वा

वीर्यवान्स्तंभंउद्यम्य) पवनपुत्रके समीप को वीर पराक्रमी मेघनाद जाताभया तदनन्तर अत्यन्त गर्जनि राक्षसौंकी सुनि बड़ेबली हनुमान् लोहखंभकोउदांबैकरि ९३(गरुत्मानिवमारुतिःनभःदेशंउत्पपात्भ्रमंतंहनूमंततस्यशिरोभागंशिलीमुखैःविध्वा) गरुड़की नाईं पवनपुत्र आकाशको उड़िगये तहां भ्रमते हुये हनुमान् के शिरदेशहि मेघनाद वाणोंकरिकै वेधताभया ९४ (पुनःअष्टभिःइषुभिःहृदयंषड्भिःपादयुगलंएकेनबालधिंभेदयित्वाततःघोरंसिंहनादंअथअकरोत्) पुनः आठवाणों करिहृदयको वेधन किया छावाणों करि दोऊ पायनको भेदनकिया अरु एकवाण करिकै पूछको भेदन किया तदनंतर मेघनाद महाभयंकर सिंहसमनादकरताभया ९५ ॥

ततोऽतिहर्षाद्धनुमांस्तंभमुद्यम्यवीर्यवान् ॥ जघानसारथिंसाश्वंरथंचाचूर्णयत्क्षणात् ९६ ततोऽन्यंरथमादायमेघनादोमहाबलः ९७ शीघ्रंब्रह्मास्त्रमादायबध्वा वानरपुंगवम् ॥ निनायनिकटंराज्ञोरावणस्यमहाबलः ९८ यस्यनामसततंजपंतिये ज्ञानकर्मकृतबन्धनंक्षणात् ॥ सद्यएवपरिमुच्यतत्पदंयांतिकोटिरविभासुरंशिवम् ९९ तस्यैवरामस्यपदांबुजंसदाहृत्पद्ममध्येसुनिधायमारुतिः ॥ सदैवनिर्मुक्तसमस्त बंधनःकिंतस्यपाशैरितरैश्चबंधनैः १०० ॥

इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेसुंदरकांडेतृतीयःसर्गः ३ ॥

(ततःअतिहर्षात्वीर्यवान्हनुमान्स्तंभंउद्यम्यजघानसअश्वंरथंचसारथिंक्षणात्चूर्णयत्) तदनन्तर वीररसकी परिपूरणताते अत्यन्त हर्षतेबड़े बली हनुमान् लोहखंभको उठाय मारते भये ताकीचोटते सहित घोड़ारथ पुनः सारथी इत्यादि सबको क्षणमें चूर्ण करिदिये ९६ (ततः मेघनादःमहाबलः अन्यंरथंआदाय) तदनन्तर मेघनाद महाबली औरे रथपर सवार है ९७ (महाबलःशीघ्रंब्रह्मास्त्रंआदायवानरपुंगवंबध्वाराज्ञःरावणस्यनिकटंनिनाय) महाबली मेघनाद शीघ्रही ब्रह्मास्त्रलै हनुमान्को बाँधिकै राजारावण के समीप लैजाताभया ९८ (यस्यनामसततंयेजपंतिअज्ञानकर्मकृतबंधनंक्षणात्परिमुच्यकोटिरविभासुरंशिवंतत्पदंसद्यएवयांति) जिनको रामऐसानाम सदा जे जन जपते हैं ते अज्ञानकर्म करिकै जो भवबंधन ताहि क्षणमें छोरि पुनःजहां करोरिन सूर्यनकैसो प्रकाश ऐसाकल्याण रूप तिन रघुनन्दनकोपद तहांको शीघ्रही जातेहैं ९९ (तस्यरामस्यपदअंबुजंएवमारुतिःहृत्पद्ममध्येसदासुनिधायसमस्तबंधनःसदैवनिर्मुक्ततस्यचइतरैःपाशैःबंधनैःकिं) तिन रघुनन्दन के पद कमल निश्चयकरि हनुमान् हृदय कमलमध्यमें सदा सुंदरी प्रकारते धारण किहे रहते हैं ताके प्रभावते सब बंधनसो सदा मुक्तहैं तिन हनुमान्को पुनः और पाशादि बंधनोंकरिकै क्या कोईबांधिसक्ताहै भावस्वइच्छितबँधिगयेकछु और कार्य कियाचाहते हैं १०० ॥

इतिश्रीरसिकलताश्रितकल्पद्रुमासियवल्लभपदशरणागतवैजनाथविरचिते
अध्यात्मभूषणेसुन्दरकांडेतृतीयः प्रकाशः ३ ॥

यांतंकपींद्रंधृतपाशबंधनंविलोकयंतंनगरंविभीतवत् ॥ अताड़यन्मुष्टितलैःसुकोपनाःपौराःसमंतादनुयांतईक्षितुम् १ ब्रह्मास्त्रमेनंक्षणमात्रसंगमंकृत्वागतंब्रह्मवरेणसत्वरम् ॥ ज्ञात्वाहनूमानपिफल्गुरज्जुभिर्धृतोययौकार्यविशेषगौरवात् २

सभांतरस्थस्यचरावणस्यतंपुरोनिधायाहबलारिजित्तदा ॥ बद्धोमयाब्रह्मवरेण वानरःसमागतोऽनेनहतामहासुराः ३ ॥

सवैया ॥ कहिरावणको कपिराघवदूत इतायकहांसियशोधलये । हितरामभजे शरणागतहोयहि प्राणहरोकहिक्रोधतये ॥ बधदेखिविभीषणरोकतहीं पटतैलसपुच्छजरायदये । खलघालिमहाकपिफूकिसवै पुरपूछवुझावनसिन्धुगये॥(धृतपाशबंधनंविभीतवन् नगरंविलोकयंतंयान्तंकपीन्द्रंईक्षितुं पौराः समंतात्अनुयांतसुकोपनाःमुष्टितलैःअताडयन्) शिवजी बोले हे गिरिजा आपनी इच्छाते धारणकिये पाशबंधन भयभीतकीभांति लंकानगरको देखतेहुये चले जाते जो हनुमान् तिनहिंदेखनेहेतआये जो पुरवासी राक्षसतेघेरेहुये पीछेपीछे जातेहुयेको पकरिकै हनुमान्की पृष्ठिमें मुष्टिकोंकरिकैमारतेहैं१(एनब्रह्मास्त्रंक्षणमात्रंसंगमंकृत्वाब्रह्मवरेणसत्वरंगतंफल्गुरज्जुभिः धृतःहनुमान्ज्ञात्वाअपिकार्यं गौरवात् विशेषययौ) इन हनुमान्को ब्रह्मास्त्रआय एकक्षणभरि संगमाकिया भाव अंग में लागिमात्रगया फिरि न रहिसका क्योंकि इनको बालअवस्थामें ब्रह्माने वरदानदियाहै कि मेरा अस्त्र तुमको न बाधाकरैगा इतिब्रह्माके वरदानके प्रभावकरिकै ब्रह्मास्त्रशीघ्रहीचलागया अब निर्बल रसरिनकरिकैबंधाहौं यह हनुमान्जानतेभी हैं परन्तु रावणते वार्ताकरना लंकाभस्मकरना इत्यादिकार्य बडेभारीकरनाहैं ताते विशेषकरि विनाबंधनैजातेभये २ (सभायाःअंतरस्थस्यचरावणस्यपुरःतंहनुमंतंनिधायतदाबलारिजित् आहमयाब्रह्मवरेणवानरःबद्धःसमागतःअनेनमहासुराःहताः) सभा मन्दिरके मध्यमें बैठेहैं मंत्री आदि पुनः रावण ताके आगे तिन हनुमान्को स्थापितकरि ता समय में मेघनाद बोलताभया कि मैं ब्रह्माके वरदानकरिकै इस वानरको बांधिकै इहांकोलायाहौं भावबलकरिकै नहीं बँधिसक्ताहै काहेते इसीने अक्षकुमारादि बडेबलीवीर राक्षसोंको मारिडारा है सो बलकरिकै कैसेबँधिसक्ता था ३ ॥

यद्युक्तमत्रार्यविचार्यमंत्रिभिर्विधीयतामेषनलौकिकोहरिः ॥ ततोविलोक्याहसराक्षसेश्वरःप्रहस्तमग्रेस्थितमंजनाद्रिभम् ४ प्रहस्तपृच्छैनमसौकिमागतःकिमत्र कार्यंकुतएववानरः ॥ वनंकिमर्थंसकलंविनाशितंहताःकिमर्थंममराक्षसाबलात्५ ततःप्रहस्तोहनुमंतमादरापप्रच्छकेनप्रहितोसिवानर ॥ भयंचतेमास्तुविमोक्ष्यसेमयासत्यंवदस्वाखिलराजसन्निधौ ६ ततोऽतिहर्षात्पवनात्मजोरिपुंनिरीक्ष्य लोकत्रयकंटकासुरम्॥वक्तुंप्रचक्रेरघुनाथसत्कथांक्रमेणरामंमनसास्मरन्मुहुः७॥

(आर्यमंत्रिभिःविचार्ययदिउक्तंअत्रविधीयतांएषलौकिकःहरिः नततःअंजनाद्रिभंप्रहस्तंअग्रेस्थितं विलोक्यराक्षसेश्वरःआह) पुनः मेघनाद बोला कि हे आर्यभाव नीति विद्या बुद्धि चातुर्यता आदि सबभांति आप श्रेष्ठहौ पुनः मंत्रिनकरिकै सहित विचारकरिकै जो बात कहीजाय सोईइहांपरविधान कीजिये बँधादेखि न भूलिये क्योंकि यह लोकके अन्य वानरों में नहीं है भाव अतुलबलीवीर है ऐसा जानि विचारपूर्वक कार्यकीजिये इति सुनि तदनन्तर अंजनके पर्वततुल्य शरीरहैजाको ऐसाप्रहस्त मंत्री आगेबैठाहुवा ताकीदिशिदेखि राक्षसोंको राजा रावण बोलताभया ४ (प्रहस्तएनंपृच्छवानरःकुतएवअसौकिंआगतःअत्रकिंकार्यंसकलंवनंकिंअर्थंविनाशितंममराक्षसाःकिंअर्थंबलात्हताः) रावणबोला हेप्रहस्तयाहि पूछौ वानरकहांकोहै यहक्यों यहांआयाहै यहांयाकोक्याकार्यहै सब अशोकवनकिस हेत विनाशकरादिया पुनः मेरे राक्षस किसहेत इसने ५ (ततःहनुमंतंप्रहस्तःआदरात्प्रपच्छ

वानरकेनप्रहितोसिचतेभयंमाअस्तुअखिलराजसन्निधौसत्यंवदस्वमयाविमोक्ष्यसे) तदनन्तरहनुमानप्रति प्रहस्तआदरतेपूछताभया हे वानर किसने तोकोपठावा है पुनः तोको कछुभय नहीं है सब राजोंके राजा रावणकेआगे सत्यहीकहु तौ हमकरिकै छोड़ायदियाजायगा ६ (ततःत्रयलोककंटकंअसुरंरिपुंनिरीक्ष्यपवनात्मजः मनसामुहुःरामंस्मरन्अतिहर्षात्रघुनाथसत्कथांक्रमेणवक्तुंप्रचक्रे) तब हनुमान्जी विचारकिये कि एकतौ तीनिहुलोकनको कंटकभावनिर्दयी पुनः असुरतामसीप्रकृति पुनः रिपुभाव याके पुत्रसेन पशुभटनकोबधकिया तासोंवार्ताकरना कुशलजानेकी समय नहीं है इत्यादि विचारपूर्वक रावणकोदेखि पवननन्दनमनकरिकै वारम्वार रघुनन्दनको स्मरणकरि तब अति हर्षते भावयुत वीरताकी स्थाई उत्साहते रघुनन्दनकी जो उत्तमकथाहै ताहिकहवेको प्रारम्भकरतेभये ७ ॥

शृणुस्फुटंदेवगणाद्यमित्रहेरामस्यदूतोऽहमशेषहृत्स्थितेः ॥ यस्याखिलेशस्यहृताधुनात्वयाभार्यास्वनाशायशुनेवसद्धविः ८ सराघवोऽभ्येत्यमतंगपर्वतंसुग्रीवमैत्रींमनलस्यसन्निधौ॥कृत्वैकबाणेननिहत्यवालिनंसुग्रीवमेवाधिपतिंचकारतम् ९ सवानराणामधिपोमहाबलीमहाबलैर्वानरयूथकोटिभिः ॥ रामेणसार्द्धंसहलक्ष्मणेनभोप्रवर्षणेऽमर्षयुतोऽवतिष्ठते १०संचोदितास्तेनमहाहरीश्वराधरासुतांमार्गयितुंदिशोदश ॥ तत्राहमेकःपवनात्मजःकपिःसीतांविचिन्वन्शनकैःसमागतः ११ ॥

(हेदेवगणादिअमित्रस्फुटंशृणुअशेषहृत्स्थितेरामस्यअहं दूतःयस्यअखिलेशस्यभार्यास्वनाशायसत्हविःशुनाइवत्वयाअधुनाहृता) हेदेवगणादि कौं के शत्रुरावण मेरे वचनस्पष्ट सुनौ जोअंतर्यामी रूपते सबके हृदय में स्थितहैं तिन रामको मैं दूतहौं जिन सर्वेश्वर की स्त्री अर्थात् जानकी को तुम अपने नाशहोने अर्थ यथा यज्ञमें स्थित उत्तम हव्यसो कुत्ताकरिकै हरिजाय ताही भांति तुमने अब हराहै ८ (सराघवःमतंगपर्वतंअभ्येत्यअनलस्यसन्निधौसुग्रीवमैत्रींकृत्वाएकबाणेनवालिनंनिहत्यतंसुग्रीवं एवअधिपतिंचकार) हे रावण जिन की भार्या हरि लायो सोई राघव मतंग पर्वत अर्थात् ऋष्य मूक पर जाय प्राप्त भये तहां अग्नि के समीप सुग्रीव सो मित्रताकीन्हे अरु एकही बाण करिकै बाली को मारि तिस सुग्रीव को किष्किंधा में राजाकीन्हे ९ (भोरावणसमहाबली वानराणांअधिपःमहाबलैः वानरयूथकोटिभिःसहलक्ष्मणेनरामेणसार्द्धंअमर्षयुतः प्रवर्षणेअवतिष्ठते) हेरावण सोई महाबली वानरोंकोराजा सुग्रीव तथा महाबलकरिकै युक्त वानरोंके करोरिन यूथ सहित तथा सहित लक्ष्मण राम को साथ लीन्हे वड़े क्रोध युत प्रवर्षण गिरिपर स्थित हैं १० (तेनसंचोदिताः महाहरीश्वराःदिशदिशाःधरासुतांमार्गयितुंतत्रएक अहंपवनात्मजः कपिःशनकैःसीतांविचिन्वन्संआगतः) तिन सुग्रीव करिकै पठाये हुये महाबली वीरवानरवहुत दशौ दिशनमें सीता को ढूंढवे हेत गये हैं तिनहिनमें एक महूंपवन को पुत्रबानर हौं धीरे धीरे सीता को ढूंढत संते इतै आय गयो ११ ॥

दृष्टामयापद्मपलाशलोचनासीताकपित्वाद्विपिनंविनाशितम् ॥ दृष्ट्वाततोऽहंरभसासमागतान्मांहंतुकामान्धृतचापसायकान् १२ मयाहतास्तेपरिरक्षितंवपुःप्रियोहिदेहोऽखिलदेहिनांप्रभो ॥ ब्रह्मास्त्रपाशेननिबध्यमांततःसमागमन्मेघनिनादनामकः १३स्पृष्ट्वैवमांब्रह्मवरप्रभावतस्त्यक्त्वागतंसर्वमवैमिरावण॥तथाप्यहंबद्ध

वागतोहितंप्रवक्तुकामःकरुणारसार्द्रधीः १४ विचार्यलोकस्यविवेकतोगतिंनरा क्षसींबुद्धिमुपैहिरावण ॥ दैवींगतिंसंसृतिमोक्षहेतुकींसमाश्रयात्यंतहितायदेहिनः १५

(पद्मपलाशलोचनासीतामयादृष्टाकपित्वात्विपिनंविनाशितमृततःअहंदृष्ट्वाचापशायकान्धृत मांहंतुकामान्रभसासमागतान्) कमलदलवत् नेत्र हैं जिनके ऐसीसीताइहां मैंनेदेखा पुनःवानरको चंचलस्वभाव ताते वनकोविनाशकिया तदनन्तर मोकोदेखि धनुप बाण धारणकिहे मोको मारनेकी कामनाराखि वडेवेगकरिकै राक्षस जे मेरे संमुखआये १२ (प्रभोअखिलदेहिनांदेहःप्रियोहिवपुःपरि रक्षितंतेमयाहताःततःमेघनिनादनामकःब्रह्मास्त्रपाशेनमांनिवध्यसमागमन्) हे प्रभो समग्र देहधारि नको अपनीदेह प्रियहोती है ताते अपनीदेहकी रक्षाहेत जे मोकोमारनेलगे तिनको मैंने मारा तद- नन्तर मेघनादनामे तुम्हारापुत्र ब्रह्मास्त्रपाश करिकैमोको बांधिकै तुम्हारे निकटको लयआवतभया १३ (रावणब्रह्मवरप्रभावतःमांस्पृष्ट्वाएवत्यक्त्वागतंसर्वंअवैमितथापिअहंकरुणारसार्द्रधीः हितंप्रवक्तु कामःवद्धइवआगतः) हे रावणमोको पूर्वब्रह्माने वरदिया कि तोको मेरा अस्त्र न वाधाकरैगा इति ब्रह्माकेवरप्रभावते ब्रह्मास्त्र मोको स्पर्शकियाभी परन्तु त्यागिचलागया सो सब मैं जानतारहाताहू पर करुणा रसमें भीजी बुद्धि तेरा हितकहिबे कामसों बंधेहुये की नाईंमें तेरे समीपचलाआयाहौं १४ (रावणलोकस्यगतिविवेकतःविचार्यराक्षसींबुद्धिनउपैहिदेहिनः अत्यंतहितायसंसृतिमोक्षहेतुकींदैवीं गतिंसमाश्रय) तेराहित कहताहौं लो सुनु हे रावण लोककी जो गतिहै यथा पापते नरकादि दुःखहै पुण्यते स्वर्गादि सुख हैं हरि भक्तिते मोक्ष इत्यादि सारासार विवेककरि आपनाहिताहितविचारु अरु तमोगुणी राक्षसी बुद्धिकोनप्राप्तहो भाव अधर्म अनीति त्यागकरु अपनेजीवके अत्यन्त हितहोने अर्थ ससार बंधनते छूटबेके हेतु दैवी देवनकी भापी परमार्थगतिको ग्रहणकरौ १५ ॥

त्वंब्रह्मणोह्युत्तमवंशसंभवःपौलस्त्यपुत्रोऽसिकुबेरबांधवः ॥ देहात्मबुद्ध्यापिचप श्यराक्षसोनास्यात्मबुद्ध्याकिमुराक्षसोनहि १६ शरीरबुद्धींद्रियदुःखसंततिर्नतेन चत्वंतवनिर्विकारतः ॥ अज्ञानहेतोश्चतथैवसंततेरसत्त्वमस्याःस्वपतोहिदृश्यव त् १७ इदंतुसत्यंतवनास्तिविक्रियाविकारहेतुर्नचतेऽद्वयत्वतः ॥ यथानभःसर्व गतंनलिप्यतेतथाभवान्देहगतोऽपिसूक्ष्मकः १८ ॥

(आत्मबुद्ध्याराक्षसः नाहिइतिकिमुवदेहात्मबुद्ध्यापिपश्यराक्षसः नासिकुबेरबांधवः पौलस्त्य पुत्रःअसिहिउत्तमवंशसंभवस्त्वंब्राह्मणः) हे रावण जो कहौ किमैं राक्षसहौं उत्तम क्रिया कोअधिका- री नहींहौं तौ जो आत्मबुद्धि करिकै कहिये कि तु राक्षस नहीं है यह क्या कहनाहै पुनः जो देहैं को निश्चयआत्म करि देखौ तौभी राक्षस नहींहौ काहे ते कुबेरके भाई पौलस्त्य अर्थात् पुलस्त्य केपुत्र को पुत्रहसि निश्चयकरि उत्तमवंशमें उत्पन्न भये ताते ब्राह्मणहसि १६ (देहबुद्धींद्रियदुःखसंततिः तेन) मैं ब्राह्मण मैं क्षत्री इसभांति देहैं को सत्यमानना इत्यादि जो देहबुद्धी है ताहीते काम क्रोध लोभरागद्वेषादिवश इंद्री विषयासक्त ह्वै अनेक कर्म करतताही ते दुःखउत्पन्न होता है सो केवलदेहैं में है तेरे आत्मरूपमें दुःखनहीं है (चत्वंनतवनिर्विकारतः) पुनः तूभी उसदुःखके आश्रितनहीं है क्योंकि तमरज कामादि विकार रहित अमलशुद्ध आत्मरूप सदाएक रसहै (चअज्ञानहेतोःस्वप्नोहि दृश्यवत्तथाएवअस्याःसंततेःअसत्वं) पुनःमेरे स्त्री पुत्रधन परिपूर्ण मैं सुखीहौं व मेरेधन पुत्रादि नहीं मैं दुखीहौं इत्यादि जो सत्यमानना ताको अज्ञान कारणहै भाव अज्ञानते झूठेको सत्यमाने है

कौनभांति यथा किसीराजाने स्वप्न देखा कि मैं कंगाल है गया वा कंगाल स्वप्न में राजा भयो ते यावत् सोवते तावत् सत्यमाने जागेभूठहीहै तैसेही निश्चयकरि इससंसारके दुःख सुखकी उत्पत्ति को अज्ञान ते सत्यमाने सोई ज्ञानभये परलोक व्यवहारभी भूठही है१७ (विकारहेतुःतेनचअद्वयत्व तःइदंसत्यंतुतवविक्रियानास्ति) हे रावण रजतमादि विकार कारण तेरे आत्मरूप में नहींहै क्योंकि वेदने ब्रह्मको अद्वैतकहा ताते यही आत्मरूपै सत्यहै पुनः जो तुमदेहको सत्यमानेहौ सो सत्यनहीं है (यथानभःसर्वगतंलिप्यतेनतथाभवान्देहगतःसूक्ष्मकःअपि) जैसे आकाश सूक्ष्मरूपते सवतत्त्वन में व्याप्तहै परन्तु स्पर्शरूपरस गंधादिकछु भी आकाश में छुई नहीं जाताहै तैसे तुम्हारी देहमें व्यापक सूक्ष्मआत्मा भी देहके विकार में नहीं लिप्तहोता है (तुशरीरसंगतःदेहइंद्रियप्राणआत्माइति बुद्ध्याअखिलबंधभाग्भवेत्) पुनःशरीरके संगहोने ते मेरी देहहै मेरीइंद्री हैं मेरेप्राण हैं इत्यादिआत्म अर्थात् सत्य हैं ऐसी अज्ञान बुद्धि करिकै आत्मा भी देह के सम्बन्धनको भागीहोत १८॥

देहेंद्रियप्राणशरीरसंगतस्त्वात्मेतिबुद्ध्याखिलबंधभाग्भवेत् ॥ चिन्मात्रमेवाहमजोहमक्षरोह्यानन्दभावोहमितिप्रमुच्यते ॥ देहोऽप्यनात्मापृथिवीविकारजो नप्राणआत्मानिलएषएवसः १९ मनोप्यहंकारविकारएवनोनचापिबुद्धिःप्रकृतःविकारजा ॥ आत्माचिदानंदमयोविकारवान्देहादिसंघाद्व्यतिरिक्तईश्वरः२० निरंजनोमुक्तउपाधितःसदाज्ञात्वैवमात्मानमितोविमुच्यते ॥ अतोहमात्यंतिकमोक्षसाधनंवक्ष्येश्रृणुष्वावहितोमहामते २१ ॥

(अहंएवचिन्मात्रंअहंअजःअहंअक्षरःहिआनंदभावः इतिप्रमुच्यते) हेरावण जबऐसीबुद्धिआवैकि मैं निश्चयकरिकै चैतन्यमात्रहौमैं जन्मरहित हौंमैं अक्षरअर्थात् नाशरहित निश्चयकरि आनन्द रूपहौ तबतौ वह मुक्तहोई (देहःअपिअनात्मापृथिवीविकारजःएवप्राणआत्मानसःअनिलएव)देह निश्चयकरिअनात्माहै क्योंकि पृथिवीको विकार अन्नादिसो उत्पन्नहै पुनः येप्राण भी आत्मानहींहैं क्योंकि सोतौ पवनको रूपहै निश्चयकरिकै १९ (मनःअपिनोअहंकारविकारएवचबुद्धिःअपिनप्रकृतेःविकारजादेहादिसंघात्व्यतिरिक्तअविकारवान्चिदानन्दमयःआत्माईश्वरः) मनभी आत्मानहीं है क्योंकि मनतौ अहंकार को विकारहै अहंकार पुनः बुद्धिभी आत्मानहीं है क्योंकि प्रकृतिके विकार महातत्त्वते उत्पन्नभये पुनः प्राणेन्द्रिय देहादि समूह विकारते भिन्ननिर्विकार सदाचैतन्यआनन्दमय आत्मा ईश्वरहै २० (उपाधितःसदामुक्तनिरंजनःआत्मानंज्ञात्वाएवइतोविमुच्यतेअतःआत्यान्तिकमोक्षसाधनंअहंवक्ष्येमहामतेअवहितःश्रृणुष्व) धर्माधर्मकी चिंतवनजो उपाधिहै त्यहिते छूटा पुनः निरंजन अर्थात् कारणमाया रहित शुद्ध आत्मारूपको जानेते निश्चयकरि पुरुषकी मुक्तिहोतीहै इससे जो अत्यन्त उत्तम मुक्तिको साधनहै ताहि हम कहतेहैं हे महामते बड़ी बुद्धिवाले रावण एकाग्र चित्त करिकै सुनौ २१ ॥

विष्णोर्हिभक्तिःसुविशोधनंधियस्ततोभवेज्ज्ञानमतीवनिर्मलम्॥ विशुद्धतत्त्वानुभवोभवेत्ततःसम्यग्विदित्वापरमंपदंव्रजेत् २२ अतोभजस्वाद्यहरिंरमापतिंरामं पुराणंप्रकृतेःपरंविभुम् ॥ विसृज्यमौर्ख्यंहृदिशत्रुभावनांभजस्वरामंशरणागतप्रियम् ॥ सीतांपुरस्कृत्यसपुत्रबांधवोरामंनमस्कृत्यविमुच्यसेभयात् २३ रामं

परात्मानमभावयन्जनोभक्त्याहृदिस्थंसुखरूपमद्वयम् ॥ कथंपरंतीरमवाप्नुयाज्जनोभवांबुधेर्दुःखतरंगमालिनः २४ ॥

(धियःसुविशोधनंहिविष्णोःभक्तिः ततःअतीवनिर्मलंज्ञानंभवेत्ततःविशुद्धतत्त्वमनुभवःभवेत्सम्यग्विदित्वा परमपदंव्रजेत्) बुद्धि के विशेष शोधनको विष्णु की भक्तिहै अर्थात् हरि यश श्रवण कीर्तन नाम स्मरण पद सेवन पूजन वंदन दास्य सख्य आत्मनिवेदनादि करनेते बुद्धि चित्तादि अंतःकरण शुद्धह्वैजातेहैं तब अत्यंत निर्मल ज्ञान भाव आत्म रूप की पहिचान होतीहै देहव्यवहार वृथा देखात तब विशेषि शुद्ध आत्मतत्त्वसाक्षात्कार होताहै तब मायाब्रह्म परब्रह्म इत्यादि संपूर्ण पदार्थ जानेते पुरुष परमपदको जाताहै २२ (अतःप्रकृतेःपरंविभुं पुराणंआद्यहरिं रमापतिंरामभजस्व) इसकारणते हेरावण प्रकृति ते परे सबमें व्यापक पुराण पुरुष आद्य हरि लक्ष्मी के पति जो रामहैं तिनहिं भजो कौन भांतिकि (हृदिशत्रुभावानांमौर्ख्यंविसृज्य शरणागतप्रियम् रामंभजस्व) हृदयमे जो शत्रुभाव है सो मूर्खता त्यागि के शरणागत प्रिय है जिन को ऐसे राम को भजौ ताकी उपायमैं बतावताहौं (सीतांपुरस्कृत्यसपुत्रबांधवः रामंनमस्कृत्यभयात् विमुच्यसे) हे रावण सादर जानकीजीको आगेकरि सहित पुत्र भाइन चलौ श्री रघुनाथजी को प्रणाम करौ तौ लोक में प्राण घात परलोकमें यम सांसति इत्यादि सब भयते छूटि जाहुगे २३ (हृदिस्थंसुखरूपंअद्वयम् परात्मानंरामंभक्त्याजनः अभावयन् दुःखतरंगमालिनः भवांबुधेःपरंतीरंजनः कथंअवाप्नुयात्) हे रावण जो अंतर्यामी रूपते सब के हृदय में स्थित आनंद रूप अद्वैत ऐसे परमात्मा जो रघुनन्दन तिनहिं भक्ति करिकै जो जन नहीं भावनाकरता है तो तीनिउ तापें जराजन्म मरण गर्भवास यमसांसति इत्यादि दुःखोंकी समूह तरंगै हैं जामें ऐसा भवसागरके पार तीरको जन कैसे प्राप्त ह्वै सक्ताहै भाव विना रघुनाथजीके भजे कोई जीव भवसागरकेपार नहीं जायसक्ता है २४ ॥

नोचेत्त्वमज्ञानमयेनवह्निनाज्वलंतमात्मानमरक्षितारिवत्॥नयस्यधोधःस्वकृतैश्च पातकैर्विमोक्षशंकानचतेभविष्यति२५ श्रुत्वामृतास्वादसमानभाषितंतद्वायुसूनोर्दशकंधरोऽसुरः ॥ अमृष्यमाणोऽतिरुषाकपीश्वरंजगादरक्तांतविलोचनोज्ज्वलम् २६ कथंममाग्रेविलपस्यभीतवत्प्लवंगमानामधमोसिदुष्टधीः ॥ कएषरामःकतमोवनेचरोनिहन्मिसुग्रीवयुतंनराधमम् २७ त्वांचाद्यहत्वाजनकात्मजांततोनिहन्मिरामंसहलक्ष्मणंततः ॥

(नोचेत्अज्ञानमयेनज्वलंतंवह्निनाअरिवत्त्वंआत्मानं अरक्षितःचस्वकृतैःपातकैःअधःअधःनयसि चतेविमोक्षशंकानभविष्यति) हे रावण जो मेराकहा नहीं मानतेहौ अरु अज्ञानमय बरतीहुई अग्नि करिकै जरतीहुईदेखिकै शत्रुकीनाईं तुम आत्माको नहीं रक्षाकरतेहौ पुनः जीवहिंसा परधन परस्त्री हरणादि आपने कियेहुये पापोंकरिकै नीचीतेनीचीगतिको आत्माकोलिहेजातेहौ भावजो यासमयमें चूकतेहौ तौ पुनः अब तुमको कबहूं मोक्षकीशंकानहोइगी भाव ऐसे असंख्यपापकिहेउहै तिनके प्रभावते कभी भवबंधनते न छूटौगे २५ (अमृतस्यअस्वादसमानवायुसूनोःभाषितंतत्श्रुत्वाअसुरःदशकन्धरः अमृष्यमाणःरक्तांतविलोचनःज्वलम्अतिरुषाकपीश्वरंजगाद) खाने में मधुर पीछे अमरता ऐसे अमृतके स्वादसमान पवनपुत्रकोकहाहुआ वचनसोसुनिकै दुष्ट रावण न सहिसका क्रोधवशलालह्वैगये हैं नेत्रदोउ अग्नि तुल्य प्रज्वलित अत्यन्त कोपकरि हनुमान्प्रति बोलताभया २६ (प्लवंग

मानांअधमःअसिदुष्टधीःमभीतवत्ममाग्रेकथंविलपसिएपरामः कःवनेचरःकतमः सुग्रीवयुतंनराधमम् निहन्मि) तू वानरोमें अधम है हे दुष्टधी निडरकी नाईं मेरे आग कैसो वार्त्ताकरता हसि यह राम कौनवड़ावलीवीर है जिसको छोटाभाई घरतेनिकारि राज्यलैलिया तिसकी क्या प्रशंसाकरताहै तथा वनके चरनेवाला सुग्रीव काहे में है जो वालीके डरते भागभागफिरतारहा तिसकी क्या प्रशंसाकरताहै सुग्रीव सहित नरनमें अधम रामकोमारौंगो २७ (अद्यत्वांहत्वाततःजनकात्मजांततःसहलक्ष्मणंरामंनिहन्मि) हे अधम वानर अभी तोकोमारताहौं तदनन्तर जनकपुत्रीकोमारौंगो तदनन्तर सहितलक्ष्मण रामकोमारौंगो ॥

सुग्रीवमग्रेबलिनंकपीश्वरंसवानरैर्हन्म्यचिरेणवानर २८ श्रुत्वादशग्रीववचःसमारुतिर्विवृद्धकोपेनदहन्निवासुरम् ॥ नमेसमारावणकोटयोऽधमारामस्यदासोहमपारविक्रमः २९ श्रुत्वातिकोपेनहनूमतोवचोदशाननोराक्षसमेकमब्रवीत् ॥ पार्श्वेस्थितंमारयखंडशःकपिंपश्यंतुसर्वेऽसुरमित्रबांधवाः ३० निवारयामासततो विभीषणोमहासुरंसायुधमुद्यतंवधे॥ राजन्वधार्होनभवेत्कथंचनप्रतापयुक्तैःपरराजवानरः ३१ हतेस्मिन्वानरेदूतेवार्त्तांकोवानिवेदयेत्॥रामायत्वंसमुद्दिश्यवधायसमुपस्थितः ३२ ॥

(वानरअग्रेकपीश्वरंवलिनंसुग्रीवंसवानरैःअचिरेणहन्मि) हे वानर ताके आगेवानरोंको राजाजो बड़ावली सुग्रीवहै ताको सहित वानरनथोरेही कालमें मरिहौं २८ (दशग्रीववचःश्रुत्वासमारुतिःअसुरम्दहन्इवविवृद्धकोपेनअधमाःरावणकोटयःमेनसमानअपारविक्रमःअहंरामस्यदासः) दशग्रीवरावणके वचन सुनि सो मारुत नन्दन रावणको भस्मकरने के समान बड़े कोपकरिकै बोले कि तू सबको क्यामारैगा जो अधम रावण करोरिनहौंइतौ युद्धमें अकेले मेरी समान नहीं हैं क्योंकि अपार है पराक्रम जाके ऐसा मैं रघुनाथजी को दासहौं २९ (हनूमतःवचःश्रुत्वाअतिकोपेनदशाननःएकंराक्षसंपार्श्वेस्थितंअब्रवीत्खंडशःकपिंमारयअसुरमित्रबांधवाःसर्वेपश्यंतु) हनूमान् को वचन सुनि अत्यन्त कोपकरिकै रावण एकराक्षस समीप बैठारहा ताप्रति बोलताभया कि सर्वांग खंडखंड करि इस वानरको मारडाल जामें राक्षस मंत्री बंधु आदि सब देखैं भाव जिनको इसने माराहै तिनके संबंधी शत्रुको वध देखिलेवैं ३० (ततः सायुधंउद्यतंवधेमहासुरंविभीषणःनिवारयामासराजन्प्रतापयुक्तैःपरराजवानरःवधार्हःकथंचननभवेत्) तदनन्तर सहित हथियार उद्यत मारत सन्तउसराक्षसको विभीषण मनाकरते भये पुनः रावण प्रति बोले हे राजन् प्रतापकरिकै युक्त पुनः तुम्हारे शत्रु राजाको वानर मारिबे योग्य किसी प्रकारते नहीं भाव एकतौ बलीवीर याको कौन मारि सकाहै पुनः दूतको वधनीति विरोधहै ३१ (तस्मिन् दूते वानरेहतेवार्त्तांरामायकःवानिवेदयेत्त्वंवधायत्वंउद्दिश्यसमुपस्थितः) तिसदूत वानरके मारे संते तुम्हारी वार्त्ता रामके अर्थको जाय सुनाई जिनराम के वधके हेत तुम उद्यत बैठहौ व्यंग्यजिनके हाथ आपनी मृत्यु चाहते हौ ३२ ॥

अतोवधसमंकिंचिदन्यच्चिंतयवानरे ॥ सचिह्नोगच्छतुहरिर्यंदृष्ट्वायास्यतिद्रुतम् ३३ रामःसुग्रीवसहितस्ततोयुद्धंभवेत्तव ॥ विभीषणवचःश्रुत्वारावणोप्येतदब्रवीत् ३४ वानराणांहिलांगूलेमहामानोभवेत्किल ॥ अतोवस्त्रादिभिःपुच्छंवेष्ट

यित्वाप्रयत्नतः ३५ वह्निनायोजयित्वैनंभ्रामयित्वापुरेऽभितः ॥ विसर्जयतपश्यं तुसर्वेवानरयूथपाः ३६ तथेतिशणपट्टैश्चवस्त्रैरन्यैरनेकशः । तैलाक्तैर्वेष्टयामासु र्लांगूलंमारुतेर्दृढम् ३७ पुच्छाग्रेकिंचिदनलंदीपयित्वाथराक्षसाः ॥ रज्जुभिःसु दृढंबध्वाधृत्वातंबलिनोऽसुराः ३८ समंताद्भ्रामयामासुश्चोरोयमितिवादिनः ॥ तूर्यघोषैर्घोषयंतस्ताडयंतोमुहुर्मुहुः ३९ ॥

(अतःवधसमंवानरेकिंचित्अन्यत्चिंतयसचिह्नःहरिःगच्छतुयंदृष्ट्वासुग्रीवसहितःरामःद्रुतंआया स्यति) इसकारणते वधके समान वानर विषे कछु और दंड विचार करौ जामें सहित चिह्न वानर जाय जाको देखि सुग्रीव करिकै सहित रामशीघ्रही आवहिं ३३ (ततःतवयुद्धभवेत्विभीषणवचःश्रु- त्वारावणःअपिएतत्अब्रवीत्) तदनन्तर तुम्हारे साथ रामका युद्धहोई इतिविभीषणको वचन सुनि रावण भी ऐसा बोलताभया ३४ (वानराणांहिलांगूलेकिलमहामानःभवेत्अत.प्रयत्नतःवस्त्रादिभिः पुच्छंवेष्टयित्वा) वानरनको लांगूलविषे निश्चयकरि महामान अर्थात् प्रीति होतीहै इस कारणते यत्न पूर्वक वस्त्रादिकोंकरिकै पूछको लपेटौ ३५ (वह्निनायोजयित्वापुरेअभिहितःएनंभ्रामयित्वावि सर्जयतसर्वेवानरयूथपाःपश्यन्तु) अग्नि करिकै योजितकरौ भाव पूछमें अग्नि करिजराय पुनः लंका पुरमें सबदिशि घुमायकै छोड़िदेउ जब इहांते जायगा तब सब वानर यूथपपूछहीन देखैंगे तब जानैं गेकि लंकागये को यही फलहै ३६ (तथा इतिशणपट्टैःचअनेकशःअन्यैःवस्त्रैःतैलाक्तैःमारुतेःलांगू- लंदृढम्वेष्टयामासुः) तैसही होय ऐसा कहि राक्षसनकेपटटाट करिकै पुनः अनेक प्रकार ऊन सू- ताटि वस्त्रों करिकै तेल बोरिकरिकै हनुमानके लांगूलको पुष्टकरि लपेटतेभये ३७ (अथराक्षसाःपु- च्छाग्रेकिंचित्अनलंदीपयित्वारज्जुभिःसुदृढंबध्वातंबलिनःअसुराःधृत्वा) अब राक्षस पूछके अग्रकछु आगि जरायकै रसरिनकरिकै पुष्टबांधि ताको बली राक्षस गहिकै ३८ (अयंचोरः इति वादिनःस मंतात्भ्रामयामासुःतूर्यघोषैःघोषयतः मुहुःमुहुःताडयंतः) यहचोर है ऐसा कहते हुये सर्वत्र घुमावते भये साथ में तुरही आदि बाजों करिकै शब्द होता है वारंवार मारते हैं ३९ ॥

हनुमतापितत्सर्वंसोढुंकिंचिच्चिकीर्षुणा ॥ गत्वातुपश्चिमद्वारसमीपंतत्रमारुतिः ४० सूक्ष्मोबभूवबंधेभ्योनिःसृतःपुनरप्यसौ ॥ बभूवपर्वताकारस्ततउत्प्लुत्यगो पुरम् ४१ तत्रैकस्तंभमादायहत्वातान्रक्षिणःक्षणात् ॥ विचार्य्यकार्य्यशेषंसः प्रासादाग्राद्गृहाद्गृहम् ४२ उत्प्लुत्योत्प्लुत्यसंदीप्तपुच्छेनमहताकपिः ॥ ददाह लंकामखिलांसाट्टप्रासादतोरणाम् ४३ हातातपुत्रनाथेतिक्रंदमानाःसमंततः ॥ व्याप्ताःप्रासादशिखरेप्यारूढादैत्ययोषितः ४४ देवताइवदृश्यंतेपतंत्यःपावकेऽखि लाः ॥ विभीषणगृहंत्यक्त्वासर्वंभस्मीकृतंपुरम् ४५ ॥

(किंचित्चिकीर्षुणाहनूमताऽपितत्सर्वंसोढुंतु पश्चिमद्वारसमीपंगत्वातत्रमारुतिः) कछु और कार्य करने की इच्छा करिकै हनुमान् भी राक्षसों को तिरस्कार सो सब सहतेहैं पुनः जब पश्चिकाद्वार के समीप गये तहां पवन पुत्र ४० (सूक्ष्मःबभूवबंधेभ्यः निःसृतःअपि असौपर्वताकार.बभूवततःगोपु रंउत्प्लुत्य) उहांसूक्ष्म तन हो जाते भये ढीलेपरे रस्सी बंधनोंते निसरि पुनः निश्चय करिये हनुमान् बाढ़िकै पर्वताकार ह्वै जाते भये तदनंतर द्वार के ऊपर कूदि चढ़ि गये ४१ (तत्रएकस्तंभं आदायर

रक्षिणःतान्क्षणात् हत्वाशेषंकार्यविचार्यसःप्रासादअग्रात्गृहात्गृहम्) द्वारऊपरजायतहां एकखंभाउचारि लैकै यावत् इनके रखावनेवाले रहैं तिन को क्षण भरे में मारि डारे पुनः और बाकी जो कार्य्य रहा हैताको विचार करिकै ऊँचे महल पर जाय तापरते एक मंदिरते दूसरे मंदिरपर ४२ (उत्प्लुत्य महताकपिः पुच्छेनसंदीप्तसअट्टप्रासादतोरणाम्अखिलाम् लंकाम्ददाह) एक मंदिर परते कूदि दूसरे पर जाय महा कपि हनुमान् पूछ की अग्नि करिकै अग्नि ज्वलित करते हुये सहित अटारी मंदिर द्वारादि संपूर्ण लंकापुरी भस्म करिदेते भये ४३ (प्रासादशिखरेअपि आरूढादैत्ययोषितः हातातपुत्र नाथइतिक्रंदमानाः समंततःव्याप्तः पावकेअखिलाःपतंत्यः देवताइवदृश्यंते विभीषणंगृहंत्यक्त्वा सर्वं पुरंभस्मीकृतम्) मंदिरन के ऊपर चढ़ी हुई राक्षसोंकी स्त्रीतें हा तात हा पुत्र हा नाथ ऐसा पुकारि रोवती चिल्लातीहुई अरु सर्वत्र व्यापक अर्थात् वरतीहुई अग्नि बिषे वरतीहुई गिरतीहैं तेदेवता सम देखातीहैं इसी भांति एक बिभीषण को घर बराय और सब पुर भस्म करि दिये ४४ । ४५ ॥

ततउत्प्लुत्यजलधौहनूमान्मारुतात्मजः ॥ लांगूलंमज्जयित्वांतःस्वस्थचित्तोबभूवसः ४६ वायोःप्रियसखित्वाच्चसीतयाप्रार्थितोऽनलः॥नददाहहरेःपुच्छंबभूवात्यंतशीतलः ४७ यन्नामसंस्मरणधूतसमस्तपापास्तापत्रयानलमपीहतरंतिसद्यः ॥ तस्यैवकिंरघुवरस्यविशिष्टदूतःसंतप्यतेकथमसौप्रकृतानलेन ४८ ॥

इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेसुन्दरकाण्डेचतुर्थःसर्गः ४ ॥

(तत्मारुतात्मजः हनूमान्उत्प्लुत्यजलधौ लांगूलंमज्जयित्वासः अंतःस्वस्थचित्तःबभूव) सब लंका भस्म करि तब पवन पुत्र हनूमान् लंकाते कूदे आय समुद्र विषे जल में ज्वलित लांगूल बोरि दिये अग्नि बुझाय तब सो हनुमान् अंतःकरण में स्वस्थ चित्त अर्थात् श्रम रहित प्रसन्न होते भये अब पार्वती जी शंकाकिया कि प्रचंड अग्नि की ज्वालन में रहे अरु हनुमान् क्यों नजरे तापर शिव जी कहते हैं ४६ (वायोःप्रियसखित्वात्च सीतायाःप्रार्थितःअनलः अत्यंतशीतलःबभूवहरेः पुच्छंन ददाह) हनुमान् के पिता पवन तिनको प्रिय सखाहै अग्नि इति मित्र को पुत्र जानि पुनः सीता करिकै प्रार्थना कियागया ताते अग्नि अपनी दाहकता त्यागि अत्यंत शीतल होता भया इसकारण हरि जो बानर अर्थात् हनुमान्जी तिनकी पूछ को अग्नि नहीं जरावता भया ४७ (यन्नामस्मरणासमस्तपापाः धूततापत्रयानलंअपीहसद्यः तरंतितस्यएवरघुवरस्यविशिष्टदूतः किंअसौप्रकृतानलेनकथंसंतप्यते) पूर्वमाधुर्यमें कहे अब ऐश्वर्य में कहत कि जिन प्रभुको राम ऐसा नाम स्मरणकरि जन सब प्रकार के पापदूरि करि देते हैं पुनः तापत्रय यथा अधिदैहिक ज्वर शूलादि अधि भौतिक शत्रुराज दंडादि पुनः अधिदैविक दरिद्र हानि वियोगादि जो तीनिहु तापै तिन करिकै उत्पन्न जो दुःखाग्नि तिसको भी निश्चय करिशीघ्रतरि जाता है भाव तापदुःखनहीं व्यापता है ऐसाप्रभाव जाके नाममें है तिन रघुनंदन को उत्तमदूत हनुमान् को क्या है तुच्छ यह लौकिक अग्नि तिस करिकै कैसे संतप्तहोवैं ४८ ॥

इतिश्रीरसिकलताश्रितकल्पद्रुमसियवल्लभपदशरणागतबैजनाथ
बिरचितेअध्यात्मभूषणेसुंदरकाण्डेचतुर्थः प्रकाशः ४ ॥

तत सीतांनमस्कृत्यहनूमानब्रवीद्वचः ॥ आज्ञापयतुमांदेविभवतीरामसन्निधिम् १ गच्छामिरामस्त्वांद्रष्टुमागमिष्यतिसानुजः ॥ इत्युक्त्वात्रिःपरिक्रम्यजानकींमारुतात्मजः २ प्रणम्यप्रस्थितोगंतुंइदंवचनमब्रवीत् ॥ देविगच्छामिभद्रंते तूर्णंद्रक्ष्यसिराघवम् ३ लक्ष्मणंचससुग्रीवंवानरायुतकोटिभिः ॥ ततःप्राहहनूमंतंजानकीदुःखकर्शिता ४ त्वांदृष्ट्वाविस्मृतंदुःखमिदानींत्वंगमिष्यसि ॥ इतःपरं कथंवर्तेरामवार्ताश्रुतिंविना ५ मारुतिरुवाच ॥ यद्येवंदेविमेस्कंधमारोहक्षणमात्रतः ॥ रामेणयोजयिष्यामिमन्यसेयदिजानकि ६ ॥

सवैया ॥ सियबोधि प्रणम्य चलेकपि सोफल खात सुकंठसुमोदलहे । हनुमान् पुराकरिआयसबै कपिराजसराघव पाँयगहे ॥ मणिदीन सिया कुशलातदुखी निजकृत्य सबैहनुमान् कहे । फलखाय समग्रउपारि बनैखलमारि घनेपुरलंकदहे ॥ (ततःहनुमान्सीतांनमस्कृत्यवचःअब्रवीतुदेविरामसन्निधिम्भवतीमांआज्ञापयतु) तदनंतर हनुमान् सीताको नमस्कार करि वचन बोलते भये हे देवि रघुनाथजीके समीपजाने को आपमोको आज्ञा दीजिये १ (गच्छामित्वांद्रष्टुंसानुजःरामःआगमिष्यति इतिउक्त्वामारुतात्मजःजानकींत्रिःपरिक्रम्य) मैं जांउतौ तुम्हारे देखने को सहित लक्ष्मण रघुनाथ जी आवहिंगे ऐसाकहि हनुमान् जानकी को तीनि परिक्रमा करिकै २ (प्रणम्यगंतुंप्रस्थितःइदंवचनंअब्रवीतुदेवितेभद्रंगच्छामितूर्णंराघवंद्रक्ष्यसि)प्रणामकरि चलिबे पर उद्यत ह्वै हनुमान् ऐसावचन बोलतेभये हे देवि तुम्हारा कल्याण होय अब मैं जाताहौं शीघ्रही रघुनाथजी को देखहुगी कौन भांति ३ (लक्ष्मणंचवानरायुतकोटिभिःसुग्रीवंततःदुःखकर्शिताजानकीहनुमंतप्राह) लक्ष्मणको पुनः हजारन करोरिवानरन सहित सुग्रीवको देखौगी तबदुःख करिकै दुर्बल जानकी सो हनुमान् प्रति बोलती भई४ (त्वांदृष्ट्वादुःखंविस्मृतंइदानींत्वंगमिष्यसिइतःपरंविनारामवार्ताश्रुतिंकथंवर्ते) हेहनुमान् तुमको देखिकै दुःख बिसरि गयाहै अबतुम जातेहौ इस्के पाछे विना रघुनंदन की वार्ता सुने कैसे रहौंगी ५ (देवियदिएवंमेस्कंधंआरोहजानकियदिमन्यसेक्षणमात्रतःरामेणयोजयिष्यामि) तबहनुमान् बोले किहे देवि जो ऐसही है तौ मेरेकांधेपर चढ़ौ हे जानकी जो मेरा कहा मानौ तौएकक्षणमात्र में रघुनंदन करिकै तुमको मिलाय देऊँगो ६ ॥

सीतोवाच ॥ रामःसागरमाशोष्यबध्वावाशरपंजरैः ॥ आगत्यवानरैःसार्द्धंहत्वा रावणमाहवे ७ मांनयेद्यदिरामस्यकीर्तिर्भवतिशाश्वती ॥ अतोगच्छकथंचापि प्राणान्संधारयाम्यहम् ८ इतिप्रस्थापितोवीरःसीतयाप्रणिपत्यताम् ॥ जगाम पर्वतस्याग्रेगंतुंपारंमहोदधेः ९ तत्रगत्वामहासत्वःपादाभ्यांपीड्यन्गिरिम्॥ जगामवायुवेगेनपर्वतश्चमहीतलम् १० ततोमहीसमानत्वंत्रिंशद्योजनमुच्छ्रितः॥ मारुतिर्गगनांतस्थोमहाशब्दंचकारसः ११ तंश्रुत्वावानराःसर्वेज्ञात्वामारुतिमागतम् ॥ हर्षेणमहताविष्टाःशब्दंचक्रुर्महास्वनम् १२ ॥

(रामःसागरंआशोष्यवाशरपंजरैःबध्वावानरैःसार्द्धंआगत्यआहवेरावणंहत्वा) हनुमान् के वचन सुनि जानकीजी बोली कि चोरी ते जाना लघुता है ताते रघुनंदन वाण की अग्नि करिकै समुद्रको शोषिलेवैं अथवा वाणसमूहौं को पजरकरिकै सेतुबांधि वानरों करिकै सहित आयसंग्राम में रावण

को मारिकै ७ (यदिमांनयेत्रामस्यशाश्वतीकीर्तिःभवति अतःगच्छ अहंकथंचापिप्राणान्संधारयामि) रावण मारिकै जो मोको लैजांयगे तौ रघुनंदन की बहुतकालान कीर्ति होइगी इससे हे हनुमान् तुमजाउ अव मैं किसी भांति प्राजन को धारण किहे रहौंगी ८ (इतिसीतयाप्रस्थापितःवीरःतांप्रणिपत्यमहोदधेःपारंगंतुंपर्वतस्यअग्रेजगाम) इसप्रकार सीताकरिकै पठावा हुआ वीरहनुमान् तिन सीताको प्रणाम करिसमुद्रके पारजाने को पर्वतके ऊपर को कूदिकै चढ़िजाता भया ६ (तत्रगत्वा महासत्वःगिरिम्पादाभ्यांपीड़यन्वायुवेगेनजगामचपर्वतःमहीतलंजगाम) तिसपर गये महाबली हनुमान् उसपर्वत को पायन करिकै दबाय पवन के तुल्यवेग करिकै चलते भये पुनः जहां तेकूदेसो पर्वत इनकेदवाने ते भूमि में समायजाताभया १० (ततःत्रिंशत्योजनंउच्छ्रितःमहीसमानत्वंमारुतिःगगनांतस्थःसःमहाशब्दंचकार) तदनंतर जो तीसयोजन ऊंचा पर्वतरहा सो हनुमान् के दवाने ते ऐसा समाय गया कि ऊपर को शिराभूमि के वरावरि होगया अरु हनुमान् जाय आकाश में स्थित ह्वै सो महाभारी शब्द करतभये ११ (तंश्रुत्वासर्वेवानराःमारुतिंआगतंज्ञात्वाहर्षेणमहताविष्टःमहास्वनम्शब्दंचक्रुः) हनुमान् को कियाजो शब्द ताहि सुनिकै सब वानर हनुमान् को आगमन जानिकै बड़े आनंद सहित महाभारी रवते शब्दकरते भये अर्थात् हर्षवशगार्जि उठे १२ ॥

> शब्देनैवविजानीमःकृतकार्यःसमागतः ॥ हनूमानेवपश्यध्वंवानरावानरर्षभम् १३
> एवंब्रुवत्सुवीरेषुवानरेषुसमारुतिः ॥ अवतीर्य्यगिरेर्मूर्ध्नवानरानिदमब्रवीत् १४
> दृष्टासीतामयालंकाधर्षिताचसकानना ॥ संभाषितोदशग्रीवस्ततोऽहंपुनरागतः १५इदानीमेवगच्छामोरामसुग्रीवसान्निधिम् ॥ इत्युक्त्वावानराःसर्वेहर्षेणालिंग्य मारुतिम् १६ केचिच्चुचुंवुर्लांगूलंननृतुःकेचिदुत्सुकाः ॥ हनूमतासमेतास्तेजग्मुः प्रस्रवणंगिरिम् १७ गच्छंतोददृशुर्वीरावनंसुग्रीवरक्षितम् ॥ मधुसंज्ञंतदाप्राहुरंगदंवानरर्षभाः १८ ॥

(हनूमान्एवकृतकार्यःसमागतःशब्देनएवजानीमःवानराःवानरर्षभंपश्यध्वम्) कोई वानर बोला कि हनूमान् निश्चय करिकार्य पूरा करिकै आयेहैं यह अनुमान हनुमानके शब्दैकरिकै हमजानिगये कोई बोला हे वानरो वानरों में श्रेष्ठ जो हनुमान् ताहि देखौ अर्थात् आयगया १३ (एवंवीरेपुवानरेषुब्रुवत्सुसमारुतिःगिरेःमूर्ध्निअवतीर्य्यवानरान्इदंअब्रवीत्)इसप्रकारवीरवानरसव परस्परवार्ताकरते रहे ताही समयमें हनुमान् पहार केशिखरपर आकाशते उतरि वानरनप्रतिऐसोवचन वोलतेभये १४ (मयासीतादृष्टाचसकाननालंकाधर्षितादशग्रीवः संभाषितःततःअहंपुनःआगतः) मैंने सीता देखी इति कहि सावधान किये पुनः सहित वनलंका जीता रावण सों वार्ता किया भाव वन उजारि घने राक्षसों को मारि रावण सों वार्ता करिलंका भस्म करि तदनंतर मैं पुनः यहां को आया १५ (इदानींएवरामसुग्रीवसन्निधिम् गच्छामःइतिउक्त्वाहर्षेणसर्वे वानराःमारुतिंआलिंग्य) इसी समय में निश्चय करि रघुनंदन सुग्रीव के समीप को हम सब चलैंगे ऐसा जब हनुमान् कहे तब आनंद करिकै सब वानर हनुमान् को हृदय में लगाय मिले १६ (केचित्लांगूलंचुचुंवुःकेचित्उत्सुकाःननृतुःते हनूमता समेताःप्रस्रवणंगिरिम्जग्मुः)कोई तौ हनुमान् की पूछको चूँवते हैं कोई अभीष्ट प्राप्तिके आनंद वशनाचते हैं ते सब वानर हनुमान् समेत प्रवर्षण गिरिको जहां रघुनंदन वास किहे हैं तहां को यात्रा करते १७ (सुग्रीवरक्षितंमधुसंज्ञंवनंगच्छंतवीराःददृशुःतदावानरर्षभाःअंगदंप्राहुः) सुग्रीव

करिकै रक्षा किया हुवा जो मधुनामे वनहै फलाहुवा ताको जाते हुये वानर बीर देखतेभये तासमय में उत्तम वानर सब अंगद प्रति बोलते भये १८ ॥

क्षुधिताःस्मोयंवीरदेह्यनुज्ञांमहामते ॥ भक्षयामःफलान्यद्यपिवामोऽमृतवन्मधु १९ संतुष्टाराघवंद्रष्टुंगच्छामोऽद्यैवसानुजं २० ॥ अङ्गदउवाच ॥ हनूमान्कृतकार्योयंपिवतैतत्प्रसादतः ॥ जक्षध्वंफलमूलानित्वरितंहरिसत्तमाः २१ ततःप्रविश्यहरयःपातुमारेभिरेमधु॥रक्षिणस्ताननादृत्यदधिवक्त्रेणनोदितान् २२ पिवतस्ताडयामसुर्वानरानवानरर्षभाः॥ततस्तान्मुष्टिभि.पादैश्चूर्णयित्वापपुर्मधु २३ ततोदधिमुखःक्रुद्धःसुग्रीवस्यसमातुलः ॥ जगामरक्षिभिःसार्द्धंयत्रराजाकपीश्वरः २४ गत्वातमब्रवीदेवचिरकालाभिरक्षितम् ॥ नष्टंमधुवनंतेद्यकुमारेण हनूमता २५ ॥

